# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** **प्रश्नपत्रम् – 4** गुणाः –70

**विषयः – प्राच्य-अर्थशास्त्रम् एवं राजनीतिशास्त्रम्** **कोड –G.E..-2.4.4** समयः - 3 तः 6 पर्यन्तम्

**दिनाङ्कः –** 02/04/2019 सन्दर्भग्रन्थः – कौटिल्य-अर्थशास्त्रम् (8-10)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः संस्कृते ससन्दर्भं भावार्थं लिखत।** **10**

(1) प्रकृतिव्यसनवानां तु व्यसनस्य विशेषतः।
बहुभावोऽनुरागो वा सारो वा कार्यसाधकः ॥

(2) द्वयोर्द्वयोर्व्यसूनयोः प्रकृतीनां बलाबलात्।
पारम्पर्यक्रमेणोक्तं थाने स्थाने च कारणम् ॥

(3) पीडनानामनुत्पत्तावुत्पन्नानां च वारणे।
यतेत देशवृद्ध्यर्थं नाशे च स्तम्भसंगयोः ॥

**प्रश्नः-2 एकस्य निबन्धात्मकमुत्तरं लिखत।** **10**

(1) दण्डोपनायिवृत्तम् विषये सविस्तरं लिखन्तु।

(2) राजाराज्ययोर्व्यसनचिन्ताविषये लिखन्तु।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः संस्कृते भावार्थं लिखत।** **10**

(1) सर्वा वा हस्वकालाः स्युर्यातव्याः कार्यलाघवात्।
दीर्घाः कार्यगुरुत्वाद्वा वर्षावासः परत्र च ॥

(2) एवं बलसमुद्दानं परसैन्यनिवारणम्।
विभवेन स्वसैन्यानां कुर्यादङ्गविकल्पशः ॥

(3) परे परेभ्यः स्वे स्वेभ्यः स्वे परेभ्यः स्वतः परे।
रक्ष्याः स्वेभ्यः परेभ्यश्च नित्यमात्मा विपश्चिता ॥

**प्रश्नः-4 एकस्य निबन्धात्मकमुत्तरं लिखत।** **10**

(1) 'शक्तिदेशकालबलाबलज्ञानं यात्राकालः' इति विषये सविस्तरं लिखत।

(2) 'बाह्याभ्यन्तराश्चापदः' इतिविषये वर्णनं कुर्वन्तु।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः संस्कृते भावार्थं लिखत।** **10**

(1) पुनरावर्तमानस्य निराशस्य च जीविते।
अधार्थो जायते वेगस्तस्माद् लग्नं न पीडयेत् ॥

(2) द्वे शते धनुषां गत्वा राजा निष्ठेत् प्रतिग्रहे।
भिन्नसङ्घातनं तस्मान्न युध्येताप्रतिग्रहः ॥

(3) एकं हन्यान्न वा हन्यादिषुः क्षिप्तो धनुष्मता।
प्राज्ञेन तु मतिः क्षिप्ता हन्याद् गर्भगतानपि ॥

**प्रश्नः-6 एकस्य विस्तरेण लिखत।** **10**

(1) स्वसैन्योत्साहनं विषये लिखत।

(2) पत्त्यश्वरथहस्तिकर्माणि वर्णयत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघूत्तरेण लिखत।** **10**

(1) अष्टमाधिकरणे प्रथमाध्यायस्य नाम किम्?

(2) ग्रन्थकारः कः?

(3) व्यसनस्य कति प्रकाराः?

(4) कोशमूलः अर्थात् किम्?

(5) प्रकृतेः संक्षिप्तस्वरूपं किम्?

(6) कामजः कति दोषाः?

(7) नवमाधिकरणस्य नाम किम्?

(8) स्तंभस्य कति प्रकाराः?

(9) लाभस्य कति विशिष्टगुणाः?

(10) आपत्तिः कतिविधा?

(11) दानस्य कति प्रकाराः?

(12) दण्डस्य कति अवयवाः?

(13) कामक्रोधादिवशात् नृपः किम् आनयति?

(14) अर्थत्रिवर्गः अर्थात् किम्?

(15) दशमाधिकरणस्य नाम किम्?